# Hayagriva Stotram

# હયગ્રીવસ્તોત્રમ્

## Document Information

Text title : Hayagriva Stotram

File name : hayagrIvastotram3.itx

Category : vishhnu, vAdirAja, vishnu, stotra, dashaka

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Sri Priya, Revathy R.

Latest update : May 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 24, 2024

*sanskritdocuments.org*

# હયગ્રીવસ્તોત્રમ્

હયગ્રીવં ચિદાનન્દવિગ્રહં સદનુગ્રહમ્ ।
દશગ્રીવચ્છિદં શાપાન્ મણિગ્રીવ વિમોચનમ્ ।
તયીગ્રીવનમશ્ચાન્દ્રસાન્દ્રકાન્તિ સમાંશુમન્ ॥ ૧॥

સ્વામિન્ સઘૃણકાપ્યમ્બા કિં બાલકમમુઞ્ચત ।
પાલય શ્રીપતે તસ્માદસ્માન્સેવકસેવકાન્ ॥ ૨॥

ઈશ તેઽનીશ જીવત્વં સ ત્વં વક્તિ ન યુક્તિમાન્ ।
અશ્વો ભૂત્વાઽપિ યો મર્ત્યો મર્ત્યો વાઽશ્વો જગત્રયે ॥ ૩॥

હયાસ્ય પશ્ય ભૃત્યન્તે હન્તે મે ભૂતરાક્ષસાઃ ।
જિઘાંસન્ત્યાસ્ત ચક્રસ્ત્વં સ ત્વં વિસ્તાર્ય રક્ષ મામ્ ॥ ૪॥

યમોઽપિ તે ભટસ્ત્વં ચ પઞ્ચરૂપો ભવાન્પ્રભુઃ ।
આજ્ઞાપયસુ રાજાઽસૌ દાસાગ્રયં મયિ મોચયેત્ ॥ ૫॥

અનન્તગુણસમ્પૂર્ણ ધૂર્નકાઽપ્યત્ર મે પ્રિયા ।
તવ પાદાબ્જસેવૈવ જૈવબન્ધવિમોચિની ॥ ૬॥

સુરમ્ય સુખચિદ્રૂપ ધૂપદીપાર્ચનાદિકમ્ ।
તવપ્રિયં સદા કુર્યાં પુર્યાં વા પર્વતેઽપિ વા ॥ ૭॥

વિદ્યાં દેહિ વિવેકં ચ શં ચ સર્વત્ર દેહિ મે ।
શ્રદ્ધાં દેહિ તથા પાહિ મા હિનસ્તિ યથા પરઃ ॥ ૮॥

સસુરાસુરગન્ધર્વપૂર્વસર્વ જગત્પતે ।
શરણં ભવ વાણીશવીશભોગીશસેવિત ॥ ૯॥

હયાનન હરક્લેશં લેશં દર્શયન પ્રભો ।
ભવન્મુખામ્બુજે નૃત્યચ્છૃત્યન્તાખ્ય વધૂહૃદામ્ ॥ ૧૦॥

વાદિરાજાખ્યયતિના સાદરં રચિતાં સ્તુતિમ્ ।

શ્રીધરાઙ્ઘ્રિયુગે ભક્તિં સાધયન્ સર્વદા પઠેત્ ॥ ૧૧॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
હયગ્રીવસ્તોત્રં સમ્પૂર્ણમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Sri Priya

*Hayagriva Stotram*

pdf was typeset on May 24, 2024

Please send corrections to *sanskrit@cheerful.com*